मासांतिवर्षसमाप्तिर्भवति ॥ अस्माद्द्वितीयदिवसेअधिमसौरवर्षप्रवृत्तिर्नभवतिकिंतु एकादशदिनांतरे भवति ॥ इतिकारणादेकपक्षस्थचा
लनमंतरास्तदिवसज्ञानार्थमधिकमुक्तं ॥ अनयारीत्याप्रतिवर्षएकादशतिथिवृद्धिः ॥ अनयारीत्याएकादशदिनवृद्ध्या तृतीयेवर्षे अधिमासो
नभवति ॥ अथतत्तत्पक्षस्थ वारादौ तत्तत्पक्षचालनानि रहितानि- तानिकार्याणिकुतः चालकस्यऋणत्वात् ॥ तत्तत्पक्षादि-

स्यवल्लीपुवल्लीस्थचालनानि धनानि कार्याणि चालनस्य धनत्वात् ॥ तद्यथा ॥ प्रतिपक्षपंचदशकोष्ठकाः कार्याः ॥ तत्र प्रथम कोष्ठकस्थ तिथिवारेषु एको योज्यः ॥ तद्यथा ॥ प्रथमकोष्ठकस्थतिथिवारौ तावेव तयोर्मध्ये एको युक्तः कार्यः द्वितीयकोष्ठस्थतिथिवारौ भवतः ॥ एवं द्वितीयकोष्ठस्थतिथिवारमध्ये एको युक्तः तृतीयकोष्ठस्थतिथिवारौ भवतः ॥ एवमग्रेपि ॥ प्रथमकोष्ठस्थवारादिमध्ये अयं घट्यादि चालनांको०।५७।३६ घटीस्थानेरहितः कार्यः तद्द्वितीयकोष्ठस्थ घट्यादिकं भवति ॥ प्रथमकोष्ठेयथास्थित मेव ॥ एवमग्रेपि ॥ तथा प्रथमकोष्ठकस्थवल्लीयथास्थितैव ॥ तन्मध्ये चालनांको २।८।३३।३२ योजितः ॥ द्वितीयकोष्ठस्थावल्ली भवति ॥ एवमग्रेपि ॥ एवं कृते सति अंतिमकोष्ठस्थवारादिकं तेनैव चालकेन रहितं सत् द्वितीयपक्षस्थ वारादिकतुल्यं भवति ॥ तदाशुद्धोयंक्रमः ॥ अन्यथा अशुद्धः । एवं वल्ली ॥ उदाहरणं ॥ प्रथमपक्षस्थ वारादिकं १४।६।४९।२४ तिथौ वारे च एको युक्तः १५।० घटी ४९ ५० २४ एतन्मध्ये चालनांको० ५७।३० रहितः जातं द्वितीयकोष्ठस्थं वारादिकं १५।०।४८।२६।५४ एवं प्रथमपक्षस्थ वल्ली ४१।४।४१ मध्ये चालनांको २।८।३३।३२ युक्तः जाता द्वितीयावल्ली ४३।१३।१२।३२ एवमग्रेपि ॥ तथा कृते जातं ॥ एवं कृते द्वितीयपक्षस्थे तिथ्यादितुल्यं ॥ षोडशकोष्ठकस्थ तिथ्यादिकं जातं ॥ अथ वल्लीपऊर्ध्वकोष्ठजयति तत्तुल्यं तिथिसौरभस्य कोष्ठको ग्राह्यः वल्लीस्थोर्ध्वकादधस्थाया घटिका भवति ॥ तन्न्यूनं तदा सचनियुक्त पंक्तिस्थ घटिकायां तत्कोष्ठकादधस्थ घटिकाभिः सहांतरं कार्यम् ॥ तद्धनर्णसंज्ञकं भवति ॥ यदाऽधस्थ घटी मध्ये शुद्धं तदा धनसंज्ञकं अंतरं भवति ॥ अन्यथा ऋणसंज्ञकं भवति ॥ यदा चतुः पंचाशत्तिर्यक पंक्तौ घटिकादिकं फलं गृहीतं ॥ तदा तदधो घटिकायाअभावात् ॥ केन सह अंतरं कार्यमित्याह ॥ तिर्यक् पंक्तौ शून्य घटिकायां वल्लीस्थोर्ध्वकतुल्य कोष्ठकादधस्थ घटिकाभिः

१६	१५	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४
६ ४९ २४ ०	० ४८ २६ २४	१ ४७ २८ ४८	२ ४६ ३१ १२	३ ४५ ३३ ३६	४ ४४ ३६ ०	५ ४३ ३८ २४	६ ४२ ४० ४८	० ४१ १२ १२	१ ४० ४५ ३६	२ ३९ ४८ ०	३ ३८ ५० २४	४ ३७ ५२ ४८	५ ३६ ५५ १२	६ ३५ ५७ ३६	० ३५ ० ०
४१ ४ ४९ ०	४३ १३ १२ ३२	४५ २१ ५६ ४	३७ ३० २९ ३६	४९ ३१ ३ ८	५१ ४७ ३६ ४०	५३ ५६ १० १२	५६ ४ ४३ ४४	२८ १३ १७ १२	१ २१ ५८ ४८	२ ३० २४ २०	४ ३८ ५७ ५२	६ ४७ ३१ २४	८ ५६ ४ ५६	११ ४ ३८ ३८	१३ १३ १२ ०

सह त्र्यंतरं कार्यमिति ॥ अत्रोदाहरणं ॥ वल्ली।५३।५६।१० त्रिपंचादशदधस्यतिर्यक् पंक्तौचतुः पंचाशत् घटिकायाः चटयादिकं ॥ ८।५२। चतुः पंचाशत् कोष्ठकादधस्यतिर्यक् पंक्तौशून्य घटिकायाघटयादिकं ९।५ अनयोरंतरं १३ एवं बुद्धिमताज्ञेयं ॥ तदनंतरं तिर्यक् पंक्तौया घटिकागृहीता तावल्लीस्थ घटिकामध्येशोध्याः शेषाया घटिकाःपलानि भवंतितेनांतरेणागुण्यानि पश्चात् षट्भिर्भक्तोलब्धानि एतानि पूर्वस्थापित घटिमध्येरहितानि सहितानि कार्याणि तद्यथा ॥ यदाधनमंतरं तदासहितानिऋणं तदारहितानिकार्याणि ॥ एवंकृतेयाघटिकाः पलानिच भवंतिताः कोष्ठकस्थघटीमध्येयोज्याः स्युः ताघटिकाभवंति ॥ तिथिरेवचारमुल्लंघ्यश्चाग्रिमंवारंगच्छतितदा पूर्वस्मिन्वारेषष्टिघटिकात्मिकातिथिःस्याप्या ॥ यदैकवारे तिथिद्वयं भवेत्तदावमदिनं ॥ तदापूर्वेनापराकार्यासास्पष्टाभवेत् ॥ अनचारीत्या नक्षत्रयोगसाधनं ॥ अथउदा

	१४	१५	१	२	३	४	५	६	७	७	८	९	१०	११	१२	१३
वा०	शु०	श०	र०	चं०	मं०	बु०	बृ०	शु०	श०	र०	चं०	मं०	बु०	बृ०	शु०	श०
घ०	५२	४६	४७	४६	४७	४९	५२	५६	६०	१	६	११	१६	२०	२३	२४
प०	२४	२५	३३	५२	३०	३१	३५	४४	०	३३	४६	५४	३१	३२	१	३४

हरणं ॥ प्रथमपक्षस्यप्रथमकोष्ठस्यावली ४१।४।४९ अत्रवल्या मूर्ध्वांके एकचत्वारिंशद्वर्तने इतिकारणात् तिथिसौर भस्यैकचत्वारिंशत्कोष्ठकादधस्यवल्यां घटिकाचतुष्टयं वर्तने इतिकारणात् तिर्यक्पंक्तौ शून्यघटिकाया घट्यांकः ३।५ अयं अधस्य घटिकामध्ये २।५८ नशुध्यतिअतः अपूर्वघटिकामध्येशोधितः ७ पलाद्यंक्रणसंज्ञं ॥ अवांतरे क्रियमाणे घटिस्थाने शून्यमेवावशिष्यते वल्लीस्य घटिकाशून्येनगुणिताः शून्यमिवजातं षट्भक्तेशून्यमितिकारणात् ॥ घटीस्थाने शून्यत्यागः क्रियते फलं पलात्मकमंतरं गृह्यते वल्लीस्य घटिकादिकं ४।४९ इदं निर्यक्पंक्तिस्थशून्यघटीभी रहितंजातं ४।४९इद मंतरेणगुणितं ३३।४३ षड्भक्तंलब्धानि पलानि ५ एतानि पूर्वघटीमध्ये ३।५ रहितानिजातानि घटीपलानि ॥ ३।०। एता निपूर्वस्यापिप्रथमपक्षस्य प्रथमकोष्ठघटी पलमध्ये ।४९।२४ । युतानिजातानि चैत्रशुद्ध १४ भृगौ घटी पलानि।५२।२४ एवमग्रेपिबोध्यंतथाकृतेजातः प्रथमः पक्षः एतदुदाहरणो परिगणकेन गणिते क्रियमाणेयत्रकुत्रापिअंकमध्ये अंतरंपत

तिर्हिममनदोषः अस्माभिः शुद्धपुस्तकोपरिकृतमस्ति ॥ अथनक्षत्रसाधनं ॥ इष्टशकमध्ये १५ । ५१ पुस्तकीयशकेशोधिते१५४४
शोधितेशेषं ७ शकाद्धस्यांकः २४ । ५ । ९ । ३८ शेषाद्धस्यांकः १६ । २ । ६ । २३ अनयोर्योगे जातं ४० । ७ । १६ । १ दे-
शांतरपलैः ४७ सहितं ४० । ७ । १६ । ४८ उर्ध्वांकेसप्तविंशतिभिस्तष्टे जातं १३ तदधः सप्तनष्टेजातं० । एवंजातं १३ । ० । १६
। ४८ वर्षादौतिथ्यादिकं ॥ यस्मिन्दिनेतिथ्यारंभो भवति तस्मिन्नेवदिने नक्षत्रयोगारंभ इतिव्याप्तिर्नास्तीति ॥ तद्दिनात् पूर्वा
परदिनेवा भवति ॥ चैत्रशुद्ध १५ शनौहस्तनक्षत्रप्रवृत्तिः ॥ शकाद्धस्यावल्ली ५३ । ५५ । २१ शेषाद्धस्यावल्ली ४८ । ५ । ९
योगः ४२ । ० । ३० जातानक्षत्रवल्ली इदं नक्षत्रादिकं वल्लीसहितं चतुर्दशस्थानेस्थाप्यं ॥ अधिमासश्चेत्तं चदशस्थानेस्थाप्यं ॥ अ-
नुक्रमेणतत्तत्पक्षस्यनक्षत्रगुल्लाद्योज्याः ॥ तद्यथा ॥ प्रथमस्थानेशून्यकोष्ठकादधस्थं योज्यं ॥ द्वितीये प्रथमं ॥ एवमग्रेपि ॥ तद
धस्थवल्लीषुयोज्या ॥ एवंकृतेजातंप्रथमपक्षस्थंवारादिकं ॥ ०१६।४८ द्वितीयपक्षस्थं ६ । ३६ । ५८ प्रथमवल्ली ४२ । ० । ३०
द्वितीयवल्ली ४१ । ३१ । ५७ । एवमग्रेपि ॥ अथतत्तत्पक्षादिषुवारादौतत्तत्पक्षचालनानि सहितानिकार्याणि ॥ वल्लीषु चालनानि
धनानिकार्याणिप्रतिपक्षसंभविंशतिकोष्ठकाः ॥ तत्र प्रथमकोष्ठे प्रथमकोष्ठस्थनक्षत्रादिकंस्थाप्यं ॥ तदधस्तात्तत्पक्षवल्ली-
स्थाप्या ॥ तदनंतरं प्रथमकोष्ठस्थनक्षत्रादिकं यथास्थितमेव ॥ तन्मध्येएकोयुक्तः कार्यः द्वितीयकोष्ठस्थनक्षत्रवारौभवतः ॥
एवमग्रेपि ॥ तथा प्रथमकोष्ठस्थ घटिकायथास्थिताएव ॥ तन्मध्ये अयं घटयादिश्चालनांको ० । ४४ । ४८ युक्तः सन्
द्वितीयकोष्ठस्थंघटयादिकं भवति ॥ तथाप्रथमकोष्ठस्था वल्ली यथास्थितैव ॥ तन्मध्येयं घटयादिश्चालनांको २ । १३ । १६ यो-

र्यः ॥ वारस्थानेसप्तभिस्तष्टंकार्यं ॥ तदनन्तरंस्वस्वचालकाःशेषतिथ्यादिनागुण्याः ॥ चालकश्चेद्ऊनस्तदाघटिस्थानेयुक्ताः कार्याः
॥ ऋणेरहितः यदानुशुद्ध्यतितदावारादिकाग्राह्याः ॥ एवमेववल्ली ॥ एवंतिथिनक्षत्रयोगानांवारादिकंभवति ॥वल्लीसहितं ॥ अस्मा-
त्प्राग्वत्स्वस्वसौरक्षोपरिघटिकाःमाध्याःअमीष्टतिथ्यादिःस्पष्टाघटिकाभवंति ॥ उदाहरणं ॥ शके१५५१ वैशाखकृष्णा१० घटया
दानयनंतत्रचैत्रशुद्ध१ प्रतिपदमारभ्यदशमीपर्यंतमिष्टतिथयः ॥२५ वर्षादितिथ्या१५हीना११पंचदशाभिर्भक्ताःफलं० शेषं ११
तिथिगुच्छस्थंशून्यकोष्ठकादधःस्थंवारादिकं ॥०।०।० वल्लीच०।०।० इदंवर्षादिकंवारादिभिः ६।४९।२४ युतंवारस्थानेशेषति-
थि११भिर्युक्तंसप्ततष्टंजातंवारादिकं ३।४१।२४वल्लीयोजिता ४१।४।४९ चालकः ०।५७।३६शेषतिथिभिर्गुणितः१०।६३ इदंघ-
टीस्थानेरहितंजातं ३।३८।५१ वल्लीस्थानेचालकः २।८।३३।३२ शेषतिथिभिर्गुणितः२३।३४अनेनवल्लीयुक्ताजातावल्ली ४।३८
।५२ ग्राम्याप्राग्वज्जातावैशाखकृष्ण१० बुधे घटिका १६ पलानि ३१एताःपूर्वानीततुल्याजाताअस्यांतिथौनक्षत्रयोगानयनं ॥
शेषतिथयः ११ स्वषट्त्रिंशदंशोनरहिताजाताः ११ पुनस्ताएवतिथयःस्वद्वात्रिंशत्यंशेनयुक्ता ११ जातौनक्षत्रयोगौ ॥ अनयोरूर्ध्वसप्तवि
शतिवष्टंफलंशून्यकोष्ठकः नक्षत्रगुच्छस्थंशून्यकोष्ठकादधस्थंवारादि०।०।० योगगुच्छशून्यकोष्ठस्थंवारादि ॥००।० वल्ली०।०।० नक्षत्रा
दिकंवारादिकंवारस्थानेशेषनक्षत्रैर्युतं ॥ ११।०।० इदंवर्षादिस्थकोष्ठस्थनक्षत्रवारादिभिः०।१६।४८ युतंसप्ततष्टंवारादिकं४।१६।४८
वल्लीपुवल्लीयुक्ता४२।०।२०जातावल्ली४२।०।३० एवमक्जातयोगवारादिकं १७।४७ वल्ली४१।५६।घनक्षत्रचालकः४४।४८शेषनक्षत्रैर्गुणि
तः ९।१३इदंघटीस्थानेयुतजातनक्षत्रवारादिक ४।२५।१वल्लीचालकः२।१२।१६।३३ शेषनक्षत्रैर्गुणितः २१।१५।२।३ अनेनवल्लीयुताजाता-
वल्ली ६।१५।३० पूर्वानीतनक्षत्रमध्येवर्षादिस्थनक्षत्रं१३ युतंजातं २४ शततारकानक्षत्रं ॥ एवंप्राग्वज्जातं ॥ वैशाखकृष्णैकादश्यांगुरौशत-
तारकानक्षत्रस्य घटिकाः ३ पलानि ११ अथयोगवारादिस्थचालकः ॥ ३।२५।४६शेषैर्गुणितः ३७।४३।३६इदंघटीस्थाने रहितंजा-

युक्तः घटीपलमध्ये १९।४७ घट्यादिश्चालनांको ३।२५।४६ रहितः जातंद्वितीयकोष्ठकस्थंयोगादिकं १४।१।१४।२१।१५
एवं प्रथमपक्षस्य वल्लीमध्ये चालनांको २।३।१३।१८ योजितः जाताद्वितीयकोष्ठस्यावल्ली ४४।२।११।८ एवमग्रेपि ॥
प्रथमकोष्टस्यावल्ली ४१।५६।६ योगसौरभस्यैक चत्वारिंशत्कोष्ठकादधस्थ चतुः पञ्चाशत् घटिकायाघट्यांकः १।४२ अध-
स्थांकः १।३७ अंतरंक्रणेनअनेनवल्लीस्थ घटीपलानि ५।६ गुणितानिषट् भक्ते लब्धपलानि ४।१५ एतानिपूर्व घटिकामध्ये १।
४२। रहितानि १।३८ जातानिघटी पलानि एतानि पूर्वस्थापित घटीपलमध्येयुतानिजातानिचैत्रशुद्ध १५ शनौव्याघात योगघ-
टी १९ पलानि २५ एवमग्रेपितथाकृतेजातः प्रथमपक्षः ॥ अथेष्टतिथ्यादिसाधनं॥ वर्षमध्येयस्मिन्मासेयातिथिरपेक्ष्यते तत्ति-
थिपर्यंतंचैत्रादिप्रतिपदमारभ्यतिथयः स्थाप्याः ॥ ताः वर्षादितिथ्याहीनाः कार्य्याः शेषाः सौरवर्षादेरिष्टदिनपर्यंतंतिथयो भव-
न्ति॥ अभीष्टनक्षत्रयोगसाधने तास्तिथयोद्विधाः एकत्रषट्त्रिंशदंशेनहीनाः ॥ अपरत्रद्वाविंशांशेनयुताः कार्याः ॥ निरवयवेनो भय-
त्रापिवर्षादितोनक्षत्रयोगाभवंति ॥ तिथयः पंचदशभक्ताः कार्याः ॥ नक्षत्रयोगौ सप्तविंशतिभक्ताः फलंनिरवयवंग्राह्यंतेतिथिनक्षत्रयोग
कोष्ठाः स्युः एतत्कोष्ठकादधस्थस्वस्वगुच्छस्थवारादिकंस्थाप्यं॥ वल्लीचस्थाप्या ॥ वारादिकमध्यवर्षादिस्थदेशांतरसंस्कृतंवारादिकंयोज्यं वल्ली
पुवल्लीयोज्या॥ तदनंतरंवारस्थानेपंचदशभागावशेषास्तिथियोगयुक्ताः कार्याः वारस्थानेसप्तविंशत्तष्टंकार्यंएवंनक्षत्रयोगौ वर्षादिस्थनक्षत्र
योगाभ्यांसहितौकार्यौ॥ सप्तविंशत्यधिकेसप्तविंशतितष्टंकार्यं अभीष्ट नक्षत्रयोगौ भवतः ॥ अभीष्टतिथिस्तुज्ञायतेएवेतिनतदानयने
यत्नोविधेयः ॥ वारादिकमध्येस्वस्ववर्षादिस्थादेशान्तरसंस्कृतंवारादिकं योज्यंवल्लीपुवल्लीयोज्या॥ वारस्थानेशेषानक्षत्रयोगा युताः का-

॥अत्रोदाहरणं ॥ शके१५३४वैशाखशुद्ध१५ग्रहसाधनंक्रियते ॥ इष्टशकः १५३४ मध्येपुस्तकीयशके १५१४ शोधितेशेषं२० शेषादधस्यांक
०।२।२।४ वारः २ शकादधस्यांक. ७।५६।८।५२ वार ५ अनयोर्योग ७।५८।१०।५ वारयोर्योग ७ सप्ततष्टः शनिवारे जातावल्ली ७।५८।१०
।५६ एतन्मध्येवैशाखशुद्धपौर्णमासीस्यपक्षवल्ली ।०।०।०।४४ युताजातावैशाखशुद्ध१५ अर्धरात्रसमयेग्रहवल्ली ७।५८।११।४१ वारेषु ०
वारे२ युक्तः २ जातः सोमवारः ॥ इयंग्रहवल्लीरव्यादिसर्वग्रहसाधनेउपयुक्ता ॥ अत्रेदमवधेयं ॥ प्रथमतश्चैत्रादिनिकटग्रहदिनवल्लीतोव-
क्ष्यमाणरीत्यासूर्यः साध्य. सयदिअपेक्षितार्कसमस्तदाशुद्धाअन्यथाअशुद्धा ॥ यदिचार्कः एकराशिन्यूनाधिकःतदावल्लीतलांकेखरामा-
योज्याः शोध्याः परेषिक्रमाद्वयंदेयंवा ॥ उदाहरणं ॥ इष्टशकः १५५८ उक्तवज्जातावल्ली ८।०।३६।३७ वारश्च ५ वल्लीस्थसूर्य. १०।२६
।४५।२२ ॥ अपेक्षितमीनार्कादूनइतिवल्लीचतुर्थांकेखगमायोजिताजातावल्ली ८।०।३७।७ द्वयमोजनाद्वारश्च एतद्वल्लीस्थसूर्यः ११।१९।२६
।२७ अपेक्षितार्कसमइति१५५८ अस्मिन्चैत्रादितःमागमांयावल्लीशनौजाताशुद्धाएवमधिकत्वेद्रष्टव्यं ॥ अतएवोक्तं दिवाकरेण ॥ अपे-
क्षितार्कादिति ॥ अथग्रहसाधनं ॥ स्वस्वचादिकायांवल्यांयश्चतुर्थांकः तत्प्रमितकोष्ठकस्याश्चत्वारोंकास्याप्याः ॥ तदनंतरंवल्लीतृतीयांक
तुल्यकोष्ठकस्यप्रथमांकंविहायचत्वारोंकास्याप्याः ॥ ततोवल्लीद्वितीयांकतुल्यकोष्ठस्योर्ध्वांकद्वयं विहायचत्वारोंकाः स्याप्याः ॥ ततोव
ल्लीप्रथमांकतुल्यकोष्ठस्योर्ध्वांकत्रयंविहायचत्वारोंकास्याप्याः ॥ ऊर्ध्वांकास्त्याज्याः ॥ ततस्तेषांयोगःकार्यः ऊर्ध्वांकपष्ट्यधिकः षष्टित-
ष्ट. कार्यः साग्रहवल्लीघट्यादिर्भवति ॥ रविचंद्रादिवल्लीभिन्नालेख्याः ॥ अग्रेउपयुक्तत्वात् ॥ तदनंतरंग्रहवल्लीषड्गुण्याअंशादिकंस्यात् ॥
अंशास्त्रिंशद्भक्ताराशयोभवंति ॥ एवमर्धरात्रसमयेरांश्यादिग्रहाभवंति ॥ चंद्रोच्चबुधशुक्रवल्लीनांविशेषः ॥ उक्तवच्चंद्रोच्चवल्लीकार्या ॥ तस्याऊ-
र्ध्वांकेपंचचत्वारिंशद्युक्ताकार्यातदनंतरंचंद्रवल्लीमध्येशोध्यातदनंतरं षड्गुणिताकार्याचंद्रोच्चंभवति ॥ यदावल्लीमध्येवल्लीनशुद्ध्यतितदोर्ध्वां

षष्टियुताकार्या ॥ बुधशुक्रोच्चवल्लीमध्येशोध्यातदनंतरंषड्गुणिताकार्यबुधशुक्रयोः शीघ्रोच्चंभवति ॥ एवंग्रहसाधनांते रेखास्वदेशां-
तरयोजनरीत्यादिनादेशांतरसंस्कारः कार्यः ॥ अर्धरात्रेचरामावाच्चरसंस्कारोनभवति ॥ उदाहरणं शके १५३४ वैशाख शुद्ध १५ व-
ल्ली ७।५८।११।४० रविवारिकायांचत्वारिंशत्कोष्ठकादधस्यांकः ६।३४।१४।४७ एकादशकोष्ठकादधस्यांकाद्यंकविहारोचत्वारोयेकः
४८।२४।५८।३९ अष्टपंचाशत्कोष्ठकादधस्यांकः ३८।५८।२०।३४ सप्तमकोष्ठकादधस्यांकः १।५२।८।१४ चतुर्णांयोगे जातारविवल्ली १२
।५।४९।४१।५४ ऊर्ध्वांकेषष्टितष्ठेशेषं ५।४१।४१।५४ इदंषड्गुणंजातं अंशाः ३४।५८।११।२४ अंशास्त्रिंशदूनाः लब्धंराशयः एवं
राश्यादयोरविः १।४।५८।११ चंद्रवल्ली ३५।२।१२।१२ चंद्रः ७।०।१३।१२ चंद्रोच्चवल्ली ५७।४१।६।३७ ऊर्ध्वांकेशरवेद ४५युक्ताजाता४२
।४१।६।३७ इदंचंद्रवल्लीमध्ये ३५।२।१२।१२ रहितंजातं ५२।२१।५।२४ उच्चः १०।१४।३३ भौमवल्ली ४०।५३।३६।१८ भौम ९।२९।२१।३८
बुधोच्चवल्ली ५१।३४।३३।५४ रविवल्ली ५।४९।४९।५४ मध्येशुद्धाजातंबुधशीघ्रोच्चं २।२५।३०।४८ गुरुवल्ली २१।४३।३१।५८ गुरुः ४।
१०।२१।१२ शुक्रोच्चवल्ली ४३।११।३०।१८ रविवल्लीमध्येशोधिताजातंशुक्रशीघ्रोच्चं ४।१५।११।९ शनिवल्ली ५४।१७।४१।२ शनिः १०।२५।४६
।६ केतुवल्ली ३७।३०।४४।४१ केतुः ७।१५।४।२८ अयंराशीषट्कयुक्तोजातोराहुः १।१५।४।२८ अथवाकेतुवल्यामूर्ध्वांकेत्रिंश ३० युक्ता
राहुवल्ली भवतिकाश्यांदेशांतर योजनानि ६४ ऋणानिरेखास्वदेशांतरयोजनयोगतिर्ग्रहस्याक्षजैर्विभक्ताः ॥ लब्धाविलिप्ताः खचर
रो विधेयाः प्राच्यामृणंपश्चिमतोधनंचइत्यादिनादेशांतरकलाः ४७ ऋणंदेशांतरसंस्कृतोरविः १।४।५७।२४ चंद्रः ७।०।२।४० उच्चं १०
।१४।६।३८ भौमः ९।२९।२१।१३ बुधोच्चं २।२५।२७।३१ गुरुः ४।१०।२१।८ शुक्रोच्चं ४।१४।५८।५३ शनिः १०।२५।४६।५ राहुः
१।१५।४।३० इष्टशकमध्ये १५३४ नवसप्तेंदुरामाः ३१।७९ योजिताजातंकलिगतं ४७१३ कलिगतस्य सहस्रांशोंः १००० शादि ४।४२

४६शनिबीजघनं ॥एतस्यांशे१।२५।१५सहितंजातंबुधोच्चधनंतस्यधनं ६।१७।१ शनिबीजस्यांशेनरहितंजातं ३।८।३१ ऋणंगुरोः शनिबीजंशुक्रोच्चऋणं४।४२।४६बीजसंस्कृतंबुधोच्चं३।१।४४।३२गुरुः४।७।१२।३७ शुक्रोच्चं ४।१०।१७।७ शनिः ११।० ।२०।५१ ॥ अथकश्चिद्विशेषउच्यते ॥ यदाग्रहदिनवल्लीअङ्कचतुष्टयमध्येशून्यमायातितदाग्रहसाधनंकथंकार्यं ॥ यतोग्रहवाटिकायांशून्यकोष्ठकोनास्ति ॥ आदौशून्यकोष्ठकमस्तीतिचेत्तत्रशून्यस्थानेपष्टिर्वर्तते ॥ इतिकारणात् शून्यकोष्ठकस्याभावाच्छून्यस्थानेफलाभावः ॥ तत्रअंकत्रययोगेग्रहवल्लीभवति ॥ वाटिकायामंकवाटिकायामंकग्रहणे शून्यस्थानेएकैकअंकंविहाययोज्यमित्यनुवर्तते ॥ यदाशून्यस्थानेषष्टिः स्याप्यतेतदाशून्यकोष्ठकादधस्यांकोग्राह्यः ॥ एवमंकचतुष्टययोगीग्रहवल्लीभवति ॥ एवंप्रकारद्वयेतुल्येभवतिवल्ली ॥ कल्पितावल्ली ७।५८।०।४०रविवाटिकायांचत्वारिंशत्कोष्ठकादधस्यांकः ६।३४।१४।२७ अष्टपञ्चाशत्कोष्ठकादधस्यांकः ३८।५८।०।३४ सप्तमकोष्ठकादधस्यांकः ३१।५२।८।१४ एषांयोगेजातावल्ली१७।२४।४३।१५ अथवाग्रहदिनवल्ली ७।५७।६०।४०चत्वारिंशत्कोष्ठकादधस्यांकः ६।३४।१४।२७शून्यकोष्ठकादधस्यांकः ५१।२१।४१।४४सप्तपंचाशत्कोष्ठकादधःस्यांकः ३१।५२।८।१४एषांयोगे जातावल्ली १७ २४।४३।१५ अथवाग्रहदिनवल्ली ७।५०।६०।४०चत्वारिंशत्कोष्ठादधस्यांकः ६।३४।१४।२७शून्यकोष्ठकादधस्यांकः५१।२१।४१ ।४४सप्तपंचाशत्कोष्ठकादधस्यांकः४७।३६।३८।४९सप्तमकोष्ठकादधस्यांकः ३१।५२।८।१४एषांयोगेजातासैवरविवल्ली१७।२४।४३।१५ एवंसर्वग्रहेषुशून्यस्थानेशून्यकोष्ठस्यफलंचेद्दृश्यतेतदाइयंवल्लीसंपद्यते ८।१६।२४।५९तस्मादियमशुद्धा ॥ एतदुत्पन्नरवेर्विसंवादात् ॥ यदावल्यांअंकत्रयेशून्यं ॥ तदाऊर्ध्वंकिंप्रमितकोष्ठकस्यअधस्यांकमध्येअंकत्रयंत्यक्त्वाचत्वारोंकाग्राह्याःसैवग्रहवल्ली ॥ अथ रवींद्वोः स्पष्टीकरणं ॥ मंदोच्चंरविमध्यशोध्यंमंदकेन्द्रंभवतितस्यभुजांशांशाःकार्याः ॥ भुजांशतुल्यकोष्ठकादधस्यभागाद्यफलंग्राह्यं॥ तदग्रिम

कोष्टकस्यफलेनसहांतरंकार्यं ॥ तेनांतरेणभुजांशादधस्थंकलाद्यंगुण्यंषष्ट्याभक्तंफलंकलाद्यंग्राह्यंएताः कलाः पूर्वस्थापितफलमध्ये युक्ताः कार्याः ॥ अग्रिमकोष्ठकस्याधिकत्वात् ॥ अंशाद्यमंदफलंभवति ॥ मेषादिषट्केन्द्रेऋणं ॥ तुलादिषट्केधनं अनेनसंस्कृतोरविः स्पष्टोभवति ॥ अथगतिसाधनं ॥ फलादधःस्थंकलाद्यंगतिफलंग्राह्यंतदग्रिमांतरेणभुजांशाधःस्थंकलाद्यंगुण्यंषष्ट्याभाज्यंफलं कलाद्यंग्राह्यंएताः कलाः पूर्वस्थापितगतिकलामध्येसहितारहिताः कार्याः अग्रिमकोष्ठकवशात् ॥ इदंस्वकीयमध्यगतौकर्कादिकेन्द्रेधनं ॥ मकरादौऋणं ॥ सास्पष्टागतिः ॥ अनयारीत्याचंद्रस्यस्पष्टीकरणं ॥ अथोदाहरणं ॥ रवेर्मंदोच्च २।१७।१७।० रविमध्ये जातरविमंदकेंद्रे १०।१७।४०।२४ अस्यभुजांशाः ४२।११।२४ द्विचत्वारिंशत्कोष्ठकादधस्थंफलं १।२८।३ अग्रिमकोष्ठकस्थंफलं ॥१।२९।४६ अन्तरं १।४३ अनेनकलाद्यं १९।३६ गुणितं ३३।३८ षष्टिभक्तंफलं कलाद्यं ०।३३।३८ इदं पूर्वस्थापितफलमध्ये १। २८।३ सहितंजातंरवेर्मंदफलं १।२८।३६ तुलादिकेंद्रत्वाद्धनंअनेनसंस्कृतोजातः स्पष्टसूर्यः ॥ १।६।२६।० कलादधःस्थंगतिफलं १।३८। अग्रिमांतरेणनिकलात्मकेन कलाद्यं १९।३६ गुणितं ३९।१२ षष्टिभक्तं अग्रिमांकस्यन्यूनत्वात् गतिफलमध्ये १।३८ रहितं जातंगतिफलं १।३७ मकरादिकेन्द्रत्वात्ऋणं अनेनमध्यमागतिः ५९।८ संस्कृताजातास्पष्टागतिः ५७।३१ अथचंद्रस्पष्टीकरणं ॥ चंद्रोच्चंचंद्रमध्येशोधितंउच्चं १४।६।२८ चंद्रः ७।०।२।४० जातंचंद्रस्यमंदकेंद्रं ८।१५।५६।१२ उक्तवन्मंदफलंधनं ४।५३।५३ अनेनसंस्कृतोजातः स्पष्टश्चन्द्रः ७।४।५६।३३ गतिफलं १६।५७ धनंअनेनसंस्कृतामध्यागतिः ७।९०।३५ जातास्पष्टाचंद्रस्यगतिः ८०७।३२ ॥ अथभौमादीनांस्पष्टीकरणं ॥ तत्रगुरुभौमशनीनांशीघ्रोच्चमध्यमोरविः ॥ बुधशुक्रयोः पूर्वसाधितमस्ति ॥ योमध्यमो रविः सएवबुधशुक्रौ ॥ ग्रहमध्येहीनंशीघ्रोच्चंकार्यंशीघ्रकेंद्रंभवति ॥ षड्भाधिकंद्वादशराशिभ्यः शोध्यंषड्भान्न्यूनंयथास्थितमेव ॥

तस्यांशाः कार्यः अंशप्रमितकोष्ठकादधस्यशीघ्रफलं भागाद्यंस्थाप्यं ॥ अग्रिमांतरेणकलाद्यंगुण्यंषष्टिभक्तंफलंकलाद्यंग्राह्यं ॥
तत्फलंपूर्वस्थापितफलमध्येरहितंसहितंकार्यं॥ अग्रिमकोष्ठवशात् ॥तदंशाद्यंशीघ्रफलं भवति॥ मेषादौऋणं॥ तुलादौधनं॥ अस्या
र्द्धेनमध्यमः संस्कृतः कार्यः ॥शीघ्रफलार्द्धसंस्कृतोभवति ॥ तदनंतरमेतन्मध्ये मन्दोच्चं शोध्यंमंदकेन्द्रं भवति॥षडभाधिकंद्वादशराशि
भ्यः शोध्यंतस्यांशाः कार्यः तत्प्रमितकोष्ठकादधस्यंमशाद्यं मंदफलंग्राह्यं॥ अग्रिमांतरेणकलाद्यंगुण्यं॥ षष्टिभक्तंकलाद्यं॥ तत्पूर्वस्था
पितफलमध्येरहितसहितंकार्यमग्रिमकोष्ठवशात् ॥तन्मंदफलं भवतिइदंयथागतंधनर्णसंपूर्णमध्यग्रहेदेयंसमंदः स्पष्टो भवति॥इ-
दंमंदफलंपूर्वशीघ्रफलमध्येधनंचेद्धनं॥ ऋणंचेदृणंदेयं॥ द्वितीयशीघ्रफलसाधनेशीघ्रकेंद्रं भवति॥ अथवाशीघ्रोच्चंमंदस्पष्ट
मध्येशोध्यंशीघ्रकेन्द्रं भवति॥ अस्मात्पूर्ववत्शीघ्रफलंकार्यं॥ तन्मंदस्पष्टग्रहे देयंस्पष्टग्रहोभवति॥ अथगतिसाधनं॥मंदफलसाध-
नेयन्मंदांकांतरंतेनस्वीयागतिर्गुणयेत्॥ फलंकलाद्यंतत्स्वगतौमकरादिमन्दकेन्द्रेऋणंकर्कादौधनंकार्यं॥ सामंदस्पष्टागतिर्भवेत्॥ अनेनो
नाशीघ्रोच्चगतिः॥ शीघ्रगतिर्भवतिअंतिमशीघ्रफलसाधनाच्छीघ्रांकांतरंतेनांतरेणशीघ्रगतिर्गुण्यापष्टयाभाज्याफलंअग्रिमकोष्ठ
कवशान्मंदस्पष्टगतौधनर्णकार्यंसास्पष्टागतिर्भवेत्॥ विपरीतशोधनेनवक्रागतिः॥ ॥उदाहरणं॥भौममध्ये९।२९।२१।१३ एतस्या
शीघ्रोच्चरविः १।४।५७।२४शोधितःजातंशीघ्रकेंद्रं॥८।२४।२३।४९ षडभाधिकं अतश्चक्रात्शोधितं ३।५।३६।११ अस्यां
शाः ९५।३६।११शीघ्रफलंधनं ३४।२२।३८ अस्यार्धेन १७।११।१९ संस्कृतोभौमः ॥१०।१६।३२।३२एतन्मध्येये मंदोच्चं ४।१०
शोधितंजातंमंदकेन्द्रं ६।६।३२।३३ मंदफलंधनं १।२९।३६ मध्यमभौमेदत्तंजातोमंदस्पष्टोभौमः॥१०।०।५०।४९ तन्मंदफलं
प्रथमंशीघ्रकेंद्रस्यधनंदत्तंजातंद्वितीयशीघ्रकेंद्रं ८।२५।५।२५ अस्मात्प्राग्वत्शीघ्रफलंधनं ३३।५८।४६ शीघ्रफलसंस्कृतो मंदफ-

लस्पष्टोजातःस्पष्टोभौमः ॥११।४।४९।३४ मंदांकांतरेण १४ गतिर्गुणिता ४४०।४ षष्टिभक्ताफलंकर्कादिकेन्द्रत्वात् धनं ॥ ७।२०
अनेनसंस्कृतामध्यगतिः॥ ३१।२६जातामंदस्पष्टागतिः ३८।४६ अनेनोनाशीघ्रोच्चगतिः ५९।८ जाताशीघ्रकेन्द्रगतिः २०।२२इयंशी
घ्रांकान्तरेण ६ गुणिता ३२५।५२ षष्टिभक्ताफलं ५।२५ अनेनसंस्कृतामंदस्पष्टागतिर्जातास्पष्टागतिः ॥ ४४।११ इतिभौमस्पष्टीकरणं
॥अथबुधस्पष्टीकरणं॥शीघ्रकेन्द्रे १०।३।१२।५२ शीघ्रफलार्धं ७।१०।६ संस्कृतोबुधः २।१२।७।३० मंदोच्चं ७१० रहितंमंदकेन्द्रं ६२।७।३२ मं
दफलंधनं ०।१०।३६ मध्यग्रहेदत्तंमंदस्पष्टं ॥ १।५।८।० तन्मंदफलंप्रथमशीघ्रकेन्द्रेदत्तंजातं द्वितीयशीघ्रकेंद्रं १०।३।२३।८ अस्मात्पुनः
शीघ्रफलंधनं १४।१७।५५ मंदस्पष्टोदत्तंजातस्पष्टोबुधः १९।११।२५।५५ मंदांकांतरेणगतिगुणितः २९।५।४० षष्टिभक्ताफलं ४।५५ मक
रादिकेन्द्रत्वाद्ऋणंमंदस्पष्टागतिः ५४।१३ अनेनोनाशीघ्रोच्चगतिर्जाताशीघ्रकेन्द्रगतिः १९१।१९ इयंशीघ्रांकांतरेण १३ गुणिता १७।१८।२३
षष्टिभक्ताःफलं २९।५८ अनेनसंस्कृताजातास्पष्टागतिः १०३।१३ इतिबुधस्पष्टीकरणं ॥ अथगुरुस्पष्टीकरणं ॥ गुरुमध्ये ४।७।१२
।३७ सूर्यः १।४।५७।२४ शोधितःशीघ्रकेंद्रः ३।२।१५।१३ फलार्धंकरणं ४।४१।२२ संस्कृतोगुरुः ४।१।१३।१५ मंदोच्चेन ५।२० हीनमं
दकेन्द्रं १०।११ ३१ ।१५ मंदफलंधनं ३।४३।३६ मंदस्पष्टीगुरुः ४।१०।५६।३ मंदफलंप्रथमशीघ्रकेन्द्रेदत्तंजातंद्वितीयंशीघ्रकेंद्रं ३।५।५८
३० तत्शीघ्रफलंऋणं ११।२८।२८ स्पष्टोगुरुः मंदांकांतरे ३ गतिः ५ निघ्ना १५ षष्टिभक्ताफलं ०।१५ फलंमकरादित्वाद्ऋणं ४।४५ जातामंदस्पष्टा
गतिः ॥ अनयोनाशीघ्रोच्चगतिः ५८ जाताशीघ्रकेंद्रगतिः ५४।२३ इयंशीघ्रांकांतरेणगुणिता ५४।२३ षष्टिभक्ताफलंमंदस्पष्टगतौ धनंजाता
स्पष्टागतिः ५।३९ इतिगुरुस्पष्टीकरणं ॥ अथशुक्रस्पष्टीकरणं ॥ शुक्रशीघ्रकेंद्रं ८।२४।४०।१७ फलार्धंकरणं १८।५०।७ संस्कृतःशुक्रः १
।२३।४७।३१ मंदोच्चं २।२० मंदकेन्द्रं ११।३।४७।३१ मंदफलंधनं ०।४९।२५ मंदःस्पष्टःशुक्रः १।५।४६।४९ शीघ्रकेंद्रं ८।२५।२९।४३ शीघ्रफलं

धनं ३७।२४।६ स्पष्टः शुक्रः २।१३।१०।५५ मंदांकांतरं २ मंदस्पष्टागतिः ॥ शीघ्रकेंद्रंगतिः ३८।२८ शीघ्रांकांतरं २० शीघ्रगतिफलं धनं १२।
५९ स्पष्टागतिः ७०।९ इतिशुक्रः ॥ अथशनिस्पष्टीकरणं ॥ शीघ्रकेंद्रं ९।२५।३१।२७ शीघ्रफलार्द्धधनं २।४३।२७ संस्कृतःशनिः ११
।३।१२।१८ मंदोच्चं ७।२६ मंदकेंद्रं ३७।१२।१८ मंदफलंऋणं ७।३८।४६ मंदः स्पष्टः १०।२२।५० शीघ्रकेंद्रं ९।१७।५२।३९ शीघ्रफलंध-
नं ५।४८ २२ स्पष्टः शनिः १०।२८।३८।३५ मंदांकांतरं १ मंदस्पष्टागतिः २।२ शीघ्रकेंद्रंगतिः ५७।६ शीघ्रांकांतरंधनं २।५१ स्पष्टागतिः ४
।५३ अथसौरभोपरिकिंचित्स्थूलं रव्यादिग्रहाणांस्पष्टीकरणं तत्रादौअभीष्टदिवसेउक्तवत्ग्रहवल्लीसाध्यानदुपरिस्वस्वघटिकायांघ-
टिकादिग्रहःकार्यः ॥ तस्यकंदइतिसंज्ञाकार्या तदनंतरंदेशांतरसंस्कारः कार्यः ॥ सयथा ॥ यस्यग्रहस्यकलात्मकंदेशांतरंतत्तद्भुक्तफ-
लात्मकेनपलेनघटिकादिग्रहस्यपलस्थानेधनंचेत्तर्हितंऋणंचेत्तदारहितंकार्यं ॥ यस्यविकलात्मकंदेशांतरंतत्षट्भक्तंविपलात्मकेनविपलस्था
नेसहितंरहितंकार्यं ॥ तदनंतरंषड्बीजसंस्कारःकार्यः ॥ तद्यथा ॥ अंशादिबीजंषट्त्रिंशज्ज्ञेयं ॥ तेनघटिकादिग्रहःसंस्कार्यः ॥ इतिआदौकृत्वा-
तत्स्पष्टीकरणं ॥ तत्रादौसूर्यस्यसूर्यकंदस्यघटितुल्यंरविसौरभस्यं कोष्टकादधस्यंघटिकादिफलंग्राह्यं ॥ अग्रिमांतरेणशेषंगुणनीयं ॥ ष-
ष्टिभाज्यं ॥ पलात्मकेनपूर्वस्थापितघटिकादिफलस्थानेयुतंकार्यं ॥ अग्रिमस्याधिकत्वात् ॥ एवंकृतेघट्यादिस्पष्टोरविर्भवति ॥ तदनंतरंषड्गुणः
कार्यः ॥ अंशादिर्भवति ॥ अंशास्त्रिंशद्भक्तास्राशयोभवंति ॥ उदाहरणं ॥ पूर्वानीतेरविकंदः ।५।४९।४१।५४ देशांतरंऋणं ७।५० संस्कृतः
५।४१।३४।४ पंचकोष्टकादधस्यं घटिकादिफलं ५।१६।१२ अग्रिमांतरेण ५८।१७ शेषं ४९।३४।४ गुणितं २८८८ षष्टिभक्तंफलं ४८।८
अनेनघटिकाद्यं ६।४।२० युतंषड्गुणितंजातोराश्यादिस्पष्टोर्कः १।६।२६।२० अथगतिसाधनं ॥ गतगम्यकोष्टांतरंएकेनांतरितंकार्यं ॥ त-
त्स्फलाःकार्याः गतगम्यांतरापेक्षयारूपाधिकत्वेमध्यगतौरहिता ॥ न्यूनेयुताःकार्याखेः स्पष्टागतिर्भवति ॥ उदाहरणं ॥ गतगम्यांतरं ॥ ०॥

५८।१७एकेनांतरितं०।१।४३कली ४कृतंगतगम्यांतरापेक्षयारूपाधिकत्वात्॥ अनेनहीनारविमध्यगतिः ५७।२५ अथचंद्रस्पष्टीकरणं
॥ऊर्ध्वांकेपंचचत्वारिंशद्युताजाताचंद्रोच्चवल्लीतस्यलताइतिसंज्ञाकार्यातल्लतोपरिचंद्रसौरभोपरिचंद्रसौरभस्यसानुपातघटिका
दिफलंग्राह्यं ॥ तच्चंद्रकंदेपुयोज्यं ॥ तदनंतरंषड्गुणितंकार्यं॥ स्पष्टचन्द्रोभवति॥ सर्वत्रानुपातेषष्टिभाजकः ॥उदाहरणं॥लता
४१।६।३७ देशांतरं०।५० संस्कृतालता४२।४१।५।४७ चन्द्रसौरभस्यंद्विचत्वारिंशत्कोष्ठकादधस्यंसानुपातंघटिकादिफलं०।४८।५
।२८ चंद्रकेंद्रः ३५।२।१२।७ देशांतरं २।४१।२० संस्कृतं ३१।१०।२६।४७ फलेनयुक्तः ३५।२३।१५षड्गुणितःस्पष्टचंद्रः ७।४।५६।११
अथगतिः॥द्विचत्वारिंशत्कोष्ठकादधःस्थंसानुपातघटिकादिचन्द्रगतेःफलं२।१४।३५षड्गुणजाताः अंशाः १३।२७।३०षष्ट्यागुणि-
तास्पष्टाचन्द्रगतिः कलाद्या ८०७३० ॥ अथभौमस्पष्टीकरणं ॥ भौमकंदमध्येरविकंदःशोध्यः।यच्छेषंतस्यलतासंज्ञाकार्या॥ल
तायाघटीप्रमितकोष्ठकादधःस्थंभौमसौरभस्थंसानुपातंघटिकाफलंग्राह्यं ॥ तत्फलंभौमकंदेपुयोज्यं॥तदुपकंदसंज्ञकंभवति॥उप-
कंदोपरिउपकंदस्थंसानुपातंघटिकादिफलंग्राह्यं॥ तत्फलंभौमकंदमध्येयोज्यंसुकंदोभवति॥लतामध्येयोज्यंसुलताभवति॥सुलतो
परिसुलताफलंसानुपातंघट्यादिफलंग्राह्यं॥तत्फलंसुकंदेपुयोज्यंतदनंतरंघटीस्थानेदशाभीरहितंकार्यं॥तन्मकरंदसंज्ञकंभवति॥तदनंत-
रंषड्गुणितंभवतिभौमःस्पष्टोभवति॥ अनयारीत्यागुरुशन्योःस्पष्टीकरणं॥ बुधशुक्रयोःसाधितांकचतुष्टययोगेघटिकादिकेंद्रवल्लीसैवल
ताज्ञेया॥रविकन्दएवबुधशुक्रयोःकन्दौ॥ अनयोःस्पष्टीकरणं॥रविकन्दः५।४९।३४।४ भौमकन्दः ४९।५३।३६।१८दिशान्तरं४।१०संस्कृतः४९
।५३।३२।८एतन्मध्येरविकन्दशोधिताजातालता ४४।३।५८।४लतोपरिप्राप्तंसौरभस्थंघटिकादिफलं ॥४१।१२।७ अग्रिमांतरे८।२८अनुपातफ
लं०।३३।३५अनेनपूर्वफलंसंस्कृतं॥४१।११।३३।२५इदंभौमकन्दमध्येयुतंजातोपकन्दः ३१।५।५।३३एतदुपरिप्राप्तंउपकन्दफलंसानुपातं२।१४।५९

अनेनयुक्तोभौमकन्दः जातःसुकंदः ५२।८।२२।१७ पुनःफलेनयुताजातासुलता ॥४६।१८।४८।३३ सुलतोपरिप्रामंसुवल्लीफलं १३।३९
४१।५५ अनेनसुकन्दोयुक्तः ६५।४८।४।१२ दशाभिर्हीनोजातोमकरंदः ५५।४८।४।१२ षड्गुणितःजातोराश्यादिः स्पष्टोभौमः ११
।४।४८।२५ अथगतिसाधनं ॥ भौमस्योपकन्दफलयोर्गतिगम्ययोरंतरेणगतिर्गुणनीया ॥ तन्मंदफलंभवति ॥ इदंमध्यगतौगम्यस्याधिक
त्वेचुतन्न्यूनत्वेक्रणं ॥ सामन्दस्पष्टागतिर्भवति ॥ अनयोनाशीघ्रं ॥ केन्द्रगतिशीघ्रोच्चगतिर्भवति ॥ इयंसुवल्लीफलांतरेणगुण्यागतेःशीघ्रफ
लंभवति ॥ तेनफलेनगतेर्भ्यांकस्याधिकत्वेमन्दस्पष्टागतिर्भवति ॥ अनयारीत्यावुधशुक्रशनीनांगतिसाधनङ्कार्यं ॥ उदाहरणं ॥ उपकंदफलयोरं
तरं०।१३।२३ गतिः ३१।२५ गुणिताजातंमंदफलंएष्यांकस्याधिकत्वाद्धनं७।०।४१ अनेनयुतामध्यगतिः जातामंदस्पष्टा ॥ ३८।२७ अनेन
रहिताशीघ्रोच्चगतिः५९।८ जाताशीघ्रकेन्द्रगतिः २०।४१ इयंसुवल्लीफलांतरेण०।१६।५५ गुणिताजातंशीघ्रगतेःफलंएष्यांकस्यहीन
त्वाद्धनं ५।४९।५३ अनेनयुतामंदस्पष्टागतिः जातास्पष्टा ४४।१७ अथबुधस्पष्टीकरणं ॥ लता ५१।३४।३३।५४ शीघ्रकेंद्रगतिप्रमाणेन
देशांतर२४।५० संस्कृता ५१।३१।८।३० अनेनबुधकंदः ५।४९।३४ युतोजातः उपकंदः ३०।२०।४२।३४ अस्मादुपकंदफलं २११।४६।३९
अनेनसुकंदोयुक्तः जातःसुकंदः ७।५१।२०।४३ सुलतायुताजातासुलता ५२।३३।५।३३ सुवल्लीफलं १०।२३।६।२८ अनेनसुकंदोयुक्तः
१८।१४।२७।११ दशाभिर्हीनोजातोमकरंदः ८।४४।२७।११ षड्गुणितोजातोराश्यादिः स्पष्टोबुधः१।१९।२६।४३ उपकंदफलयोरंतरं०।५।१
धनंमंदस्पष्टागतिः ६४।१२ शीघ्रकेंद्रगतिः १८।१।२१। सुवल्लीफलयोरंतरंक्रणं०।१२।४७ स्पष्टागतिः१०२।५० ॥ अथगुरुस्पष्टीकरणं ॥
विकंदः ५।४९।३४।४ गुरुकंदः २१।४३।३१।५८ देशांतरं०।४० संस्कृतः २।४३।३१।१८ बीजंक्रणं०।३१।२५।१० संस्कृतः २१।१२।६
।८ एतन्मध्येरविकंदःशोधितःजातालता १५।२२।३२।४ सौरभोपरिफलं ३०।१९।४४।५१ अनेनगुरुकंदोयुक्तः जातउपकंदः५१।४१।५०।५९

उपकंदफलं २।३८।१।४८ अनेनकंदोयुक्तोजातः सुकंदः २३।५०।७।२७ सुलता १८।०।३३।५३ सुवल्लीफलं ६।५।१६।४४ अनेनसुकंदोयुक्तः २९।५५।२४ दशहीनोजातोमकरंदः १९।५५।२४।४१ षड्गुणितोगइयादिस्पष्टोगुरुः ३।२९।३२।२८ उपकंदफलयोरंतरंक्रणं ०।३।२२ पदस्पष्टागतिः ४।४४ शीघ्रकेंद्रगतिः ५४।२४ सुवल्लीफलयोरंतरंक्रणं ०।२०।२९ स्पष्टागतिः ५।१० ॥ ॥ अथभृगुस्पष्टीकरणंशुक्रलता ४३।१९।३०।१९ देशांतरं ४।५० संस्कृता ४३।१९।२५।१९ बीजंधनं ०।४७।७।४० संस्कृतालता ४४।६।४३।९ तौरक्षस्यंफलं ४९।३९।३३।८ अनेनशुक्रकन्दोभवति ५।४९।३४।४ युक्तोजातउपकन्दः ५३।२९।७।१२ उपकंदफलं २।८।१४।२७ सुकंदः ७।५७।४८।३१ सुलता ४६।१४।४७।३४ सुवल्लीफलं १४।१३।२७।५१ अनेनसुकंदोयुक्तः ६४।४६।२८।० मकरन्दः ५४।४६।२८।० षड्गुणः स्पष्टः शनिः १०।२८।३८।४८ उपकंदफलयोरन्तरंधनं ०।७।४४ मन्दस्पष्टागतिः ५७।७ सुवल्लीफलयोरन्तरंक्रणं ०।०।२० स्पष्टागतिः ४।१४ ॥ अथायनांशसाधनं ॥ इष्टशकः कुयमाब्धिहीनः कार्यः तदनन्तरस्वदशमांशेनहीनः कार्यः ॥ षष्ट्याभाज्यः ॥ अयनांशाभवन्ति ॥ उदाहरणं ॥ इष्टशकः १५।३४ अनेन ४२१ हीनः १११३ अयंद्विष्टः अस्यदशमांशेन ११।१८ रहितः १००१।४२ षष्टिभक्ताजाताअयनांशाः १६।४१।४२ ॥ अथदिनमानसाधनं ॥ स्पष्टः सूर्यः अयनांशयुक्तः कार्यः तस्यांशाः षड्भिर्भाज्याधिष्ठिकोष्ठकादधःस्थंघटयाफलंस्थाप्यं ॥ तद्दिनमानरूपं ॥ अग्रिमकोष्ठकान्तरेणशेषंगुण्यं ॥ षड्भक्तानिलब्धानिपलानि ॥ एतानिपूर्वस्थापितदिनमानफलस्थानेअग्रिमकोष्ठकवशात्सहितानिरहितानिवाकार्याणि ॥ तद्दिनमानंभवेत् ॥ उदाहरणं ॥ सूर्यः ३।६।२६।० अयनांशैर्युक्तः १।२३।७।४२ अंशाः ५३।७।४२ षष्टिभक्ताफलं ० एतत्तुल्यकोष्ठकस्यदिनमानं ३२।४४ अग्रिमान्तरेण १८ शेषं ५।७।४२ गुणितं ९२।१८।२६ षड्भिर्भक्तं लब्धपलानि १५ एतानि अग्रिमस्थापितदिनमानपलमध्येयुतोनितं ज्ञानंदिनमानं ३३।९ ॥ अथप्रकारांतरेणरवेः प्रतिराशिप्रतिराशिपलांशोपरिदिनमानसाधनं ॥ स्पष्टांकस्याप्य ॥ अयनांशसंस्कारोनास्ति ॥ रवेर्यावंतोराशयस्तदधोयावंतोभागाः संति तत्तुल्यराश्यंशा सूर्या-

दधःस्थंदिनमानंग्राह्यं ॥ अग्रिमांतरेणगुण्यंषष्ट्याभाज्यं ॥ पलात्मकंलब्धंपलस्थानेअग्रिमकोष्टकवशात्रहितसहितंकार्यंतद्दिनमानंस्यात् ॥ उदाहरणं ॥ सूर्यः १।६।२६।० एतत्तुल्यसूर्यादधस्थंदिनमानं ॥ ३३।५ अग्रिमांतरेण ३ शेषं२६।० गुणितं ७८ षष्ट्याभक्तं फलं १ अनेनसंस्कृतंजातंस्पष्टंदिनमानं ३३।६ अथचंद्रदर्शनं ॥ यस्मिन्मासेशुक्लप्रतिपदिचंद्रदर्शनमवलोक्यतेतस्मिन् मासिनद्दिनेसूर्योयद्राशावास्तितद्राशिस्थः सूर्यास्तिर्यक्पंक्तौयस्मिन् कोष्टके भवतिसकोष्टकोग्राह्यः ॥ तदनंतरंयस्मिन्राशौराहुरस्तितद्राशिस्थोराहुः ऊर्ध्वपंक्तौ यस्मिन् कोष्टके भवति तत्कोष्टकादधस्तात् सूर्यकोष्टकाभिमुखीघटीग्राह्या ॥ तदनंतरंअमावास्यायाः विद्यमानघटिकास्ताः षष्टिकामध्येशोध्याः तदनंतरंयच्छेषंभवतितद्दिनजंदिनमानंतन्मध्येयोज्यं ॥ एवंकृतेयाघटिकाभवंतिताः पूर्वस्थापितघटिभ्यश्चेदधिकास्तदाप्रतिपदिचंद्रोदृश्यः ॥ न्यूनेअदृश्यः ॥ किंतुद्वितीयायांदृश्यः ॥ उदाहरणं ॥ सूर्यः ४।२० राहुः १०।२ अत्र रविः सिंहेकुंभेराहुः ॥ अनयोः प्राप्तघटी ८१ अमावास्यायाः घटिकाः १।४० षष्टिमध्येशोधिताः ५८।५० शेषंदिनमानेनयुक्तं ॥ ३१।२४ जाताः ८९।४४ एताआभ्यः अधिकाअतोत्रप्रतिपद्येवचंद्रदर्शनं ॥ अथभौमादीनांवक्रमार्गोदयास्तसाधनं ॥ अंतिमशीघ्रफलसाधनेयच्छीघ्रकेंद्रंतस्यचक्रशुद्धस्यांकाः कार्याः प्रोक्तांशानांइष्टांशानांचसाम्येनसिद्धेवदिनेवक्रादिकंस्यात् ॥ न्यूनाधिकेयद्दिवसानयनंप्रोक्तेष्टांशानामंतरकलाः कार्याः शीघ्रकेंद्रगत्याभाज्याः ॥ लब्धंदिनघटीपलात्मकंग्राह्यंप्रोक्तांशोभ्य इष्टकेंद्रांशा अधिकास्तद्दालब्धेनअवधिस्थंवारादिकंरहितंकार्यं ॥ न्यूनेनसहितंकार्यं ॥ तद्वारघटीपलेषुवक्रादिकंस्यात् ॥ अस्तोदयाविनिदिवाकरपक्षेपाचतुर्थचरणेभौमः ३।२६।४० अनयोरंतरंकलाः ३८।११ अवधिस्थभौमगत्या १९।२३ भक्ताः फलंदिनादिकं १।५७।४१ इ-

दमवधिस्यवारादौ०।४६।२४ युतं २।४३।४५ भपादजं भौमात् अवधिस्यस्यन्यूनत्वात् ॥ एवं वैशाखशुक्लसप्तम्यांसोमेसूर्योदयाद्गत
घटीषु ३फलेषु ४५तद्भाग्यपाचनुर्थपादेनौमः ॥ अथचंद्रग्रहणं॥ पौर्णिमांतेयद्दिद्यमाननक्षत्रंतस्यगतैष्यघटिकायोगः कार्यः ॥ तत्तुल्य घटि-
कायाः स्यंचंद्रबिंबपातबिंबंनामभूभाबिंबंग्राह्यं ॥ अग्रिमांतरेणशेषफलादिगुण्यानि ॥ षष्ट्याभक्तेन लब्धांगुलैरग्रिमकोष्टक वशात् स-
हितरहितानिकार्याणि ॥ अंगुलात्मकंचंद्रबिंबं ॥ भूभाबिंबंचभवति ॥ अथभूभायाः संस्कारः ॥ पौर्णमास्यांयद्राशौसूर्यसंक्रांतिरस्ति
तद्राश्यधःस्थमंगुलादिकं पातफलंस्थाप्यं ॥ अग्रिमांतरेणसूर्यस्य भागाद्यंगुण्यं ॥ त्रिंशताभाज्यंव्यंगुलात्मकेफलेनअग्रिमकोष्टकव-
शाद्विनान्वितंकार्यं ॥ अनेनभूभायुताकार्या ॥ साभ्यष्टाभवतिपातफलंसदाधनतदनंतरंरविचन्द्रयोर्बिंबयोर्योगार्धकार्य ॥ तन्मानैक्यखंडंजा
यते ॥ तत्शरोनंकार्यंग्रासीभानि ॥ उदाहरणं ॥ शक १५३४ वैशाखशुद्ध १५ सोमे घटि ५४।४० अनुराधानक्षत्रस्य ॥ गतैष्ययोग ५८।३६
सूर्य ३।६।२०।३७ चंद्र ७।६।३४।३५ राहुः ३।१४।१८।११ अष्टपंचाशत् घटिकाधःस्थंचंद्रबिंबं ११।१० अग्रिमांतरेण ११ शेषं गुणितं ३९
।६ षष्ट्याभक्तंफलेन संस्कृतंजातंचंद्रबिंबं ११।४ भूभाबिंबं २६।१६ अनुपातफलेन २२ संस्कृतः २७।५४ तृपसंक्रांत्यधःस्थफलं०॥
३ अग्रिमांतरेण ॥ ६॥ शेषंगुणितं ३४।३७ जातं ३९ त्रिंशद्भक्तंफलेन १ संस्कृतं०।३२ अनेनभूभायुताजातास्पष्टाभूभा २८।३६ अन-
योर्योगार्धंजातंगतैष्यखंडं ॥ १९।४५ अथशरसाधनं ॥ पर्वांतकालीनः सपातात् चंद्रः कार्यः ॥ अथवाविराहुश्चन्द्रः कार्यः ॥ षडधिकत्रैराशि-
द्विशोध्य ॥ न्यूनोयथास्थितएव ॥ तस्यांशा कार्याः षड्भिर्भक्ता कार्या लब्धप्रमितकोष्टकस्थः अंगुलाद्यः शरोग्राह्यः ॥ अग्रिमांतरेणशे-
षंगुण्यंषट्भक्तंलब्धांगुलैः संस्कार्यः अंगुलात्मकः शरोभवति ॥ उदाहरणं ॥ विराहुश्चंद्रः तस्यांशाः १७।२।१६।१४ षड्भक्तीः फलं २८
।१८।४६ शरः अनुपातफलेन ६।२७ संस्कृताजाताः शरोंगुलादिः १२।६ अनेनरहितंमानैक्यखंडंजातोयासः ७।३९ अधःस्थि-

त्यानयनं ॥ ग्रासस्यांगुलप्रमितकोष्ठकादधःस्थास्थितिःस्याप्या अग्रिमांतरेणाव्यंगुलानि गुण्यानि षष्टिभक्तः लब्धपलैः सहिताः कार्याः घटिकादिस्थितिः स्यात् ॥ उदाहरणं ॥ ग्रासः ७।३९ स्थितिः ३।३५ अनुपातफलेन ॥७॥ सहिताजाता घटिकादिस्थितिः ॥ ३।४२ अन्यदवशिष्टकरणोक्तरीत्यासाध्यम् ॥ इति चंद्रग्रहणं ॥ अथ सूर्यग्रहणं ॥ शकः १५३२ मार्गशीर्षकृष्णा ३० बुधे घटि ११।५९ सूर्यः ८।५२।६।२८ लग्नं १।२।५।३४ त्रिंशोनं अमावास्यायत्संक्रांतौ भवति तत्संक्रांतिराश्यधस्थ सूर्यबिंबं स्थाप्यं ॥ अग्रिमांतरेण सूर्यस्य भागार्धं गुण्यं त्रिंशद्भक्तं अंगुलात्मकं फले अग्रिमकोष्ठकवशाद्धीनाधिकं कार्यं ॥ अंगुलाद्यं सूर्यबिंबं भवति ॥ उदाहरणं ॥ धनुराशौ सूर्यबिंबं ११।४४ आयातव्यंगुलैः संस्कृत ऊनांतरबिंबं ११।२४ अथ लंबनं ॥ त्रिंशोनलग्नार्कांतरांशाः ॥ तेषां चाराशित्रयात्स्याभवन्ति तथा कार्याः ॥ तदनंतरं षड्भिर्भाज्याः लब्धप्रमितपञ्चदशाधःस्थ घटिकादिलंबनं ग्राह्यं ॥ अग्रिमांतरेण शेषं गुण्यं षड्भिर्भाज्यं लब्धपलैः सहितं घटिकादिलंबनं स्यात् ॥ सूर्यात्त्रिंशोनलग्नाधिके सति धनं ॥ न्यूनेन ऋणं ज्ञेयं ॥ उदाहरणं ॥ त्रिंशोनलग्नार्कांतरांशाः ॥ ३।२०।४६ षड्भिर्लब्धं शून्यं ॥ शून्यादधःस्थं घटिकादिलंबनं ०।०।० अग्रिमांतरेण २४।२५ शेषं ३।२०।४६ गुणितं ८१।४२।३ षड्भिर्भक्तं लब्धं पलादिकैः १३।५८ सहितं ऊनात् ह्रस्वं घटिकादि लंबनं ०।१४ अन्यदवशिष्टं पूर्ववत् ॥ एतत्पंचदशकोष्ठकस्थलंबनस्यांकोपरि ग्रहणं स्थूलं ॥ क्रांतिसाधनमाह ॥ सायनग्रहस्य भुजांशाः कार्याः ॥ षड्भिर्भाज्याः लब्धप्रमितकोष्ठकस्थां घटिकाद्याक्रांतिः स्याप्या ॥ लम्बनवदनुपातः कार्यः ॥ तदनन्तरं षड्गुणिताः कार्याः भागादिक्रांतिः स्यात् ॥ उदाहरणं ॥ सूर्यः ८।५।२६।२० अयनांशाः २६।३९।५४ सायनः सूर्यः ८।२२।६।१४ अस्य भुजांशाः ८२।६।१४ षड्भक्ताः लब्धं ३३ घटिकादिक्रांतिः ३।५४।३६ पलात्मकेनानुपातेन २।४४ सहिता ३।५७।२० षड्गुणिताजाता भागाद्याक्रांतिः २३।४४ ग्रन्थकर्त्रा एते पंचदशकोष्ठकस्थालंबनस्यांकाः अन्ये पंचदश

कोष्ठेषुविपरिताः स्थापिताः ॥ एवंविंशत्कोष्ठेषुक्रान्त्यंकाजाताः ॥ अस्योपरिक्रान्तिसाधनं ॥ सायनग्रहः षड्भाधिकश्चेच्चक्राद्विशोध्यान्त-
स्यांशाः कार्याः षड्भिर्भाज्याः लब्धकोष्ठकस्याघटिकादिक्रान्तिः ॥ पूर्ववत्सानुपातान्ग्राह्याः अत्रानुपातफलं अग्रिमकोष्ठदशात्ना-
न्तिनङ्कार्यं ॥ इयंक्रान्तिः पूर्वेणसहतुल्या ॥ उदाहरणं ॥ सायनसूर्यः ८।२२।१६।१४ भगणा १२ च्युता ३।७।५३।४३ अंशाः ९७।५३।४६ षड्भ-
क्ताः फलं ३६ क्रान्तिः ३।५८।३६ अनुपातफलेन १।१६ रहिता षड्गुणिता सैव क्रान्तिः २३।४४० अथसूक्ष्मक्रान्तिसाधनं ॥ सायनग्रहस्य भु-
जांशाग्रिमकोष्ठकस्याभागाद्याक्रांतिः स्थाप्या ॥ अग्रिमांतरेणकलाद्यंगुण्यंषष्ट्याभागेनकलात्मकेनफलेनसहितंकार्यं भागाद्याक्रांतिः
स्यात् २३।४४।५८ अथशरसाधनं ॥ सपातश्चन्द्रस्य ॥ अथवाविराहुश्चन्द्रस्य भुजांशाग्रिमकोष्ठकस्यः कलादिः शरोग्राह्यः अग्रिमांतरे
णशेषंगुण्यंषष्ट्याभाज्यंविकलात्मकेनफलेनसहितंकार्यंकलादिबाणः स्यात् ॥ त्रिभिर्भाज्योंगुलादिः स्यात् ॥ उदाहरणं ॥ विराहुश्चंद्रस्यभु
जांशाः ७।४३।४६ शरः ३२।५३ अनुपातफलेन ३।२४ सहितो जातः कलादिः शरः ३६।१६ त्रिभिर्भक्तो जातोंगुलाद्यः शरः १२।५ अथोन्न
तांशोपरिद्वादशांगुलशंकोः छायासाधनं ॥ उन्नतांशाग्रिमकोष्ठकादधःस्थाप्याअग्रिमांतरेणशेषंगुण्यंषष्ट्याभाज्यंफलेनाग्रिमकोष्ठक
वशात्सहितंरहितंकार्यम् ॥ छायाभवति ॥ अथान्विन्यादीनांनक्षत्राणांउदयमध्यास्तलग्नज्ञानं ॥ अश्विन्युदयेमेषलग्नंराश्यादि ० । १ ।
२६।५ रेवीमध्यास्थितकर्कलग्नंराश्यादि ॥ ३।१४।३६ अस्तमयेतुलग्नंराश्यादि ६।१२।५८ एवंभरण्यादिपुज्ञेयं ॥ इतिविश्वनाथ
विरचितंमकरन्दस्योदाहरणं ॥ अथसंवत्सराद्यानयनमाह ॥ तत्रादौसंवत्सरानयनमाह ॥ शकाब्देंदु १५१४ वियुक्तशकोनग ७
गणः शून्यांबरांगोद्धृतो ९०० । भाद्यंलब्धमिताब्दवेददहनाढ्यं ३४ साब्दभूपेंदुतः ॥ दिग्भागासकलायुतंप्रभवतोब्दः षष्टिशेषास्मृ-
ताः शेषांशारविभिर्हतादिनमुखंमेषार्कतः प्राग्भवेत् ॥ १ ॥ उदाहरणं ॥ शकः १५।५६ अनेन १५१४ रहितः जातागताब्दाः ४२

सप्तभिर्गुणिताः २९४ शून्यांवरांगो ६०० घ्नः फलंराश्यादि०।०।१४।४२।० राशिस्थानेगताब्द ४२ वेददहनाभ्यांयुतः ७६। १४। ४२।० गताब्दसुनभूपेंदुतः १५८ दिग्भागा१० सकला१५।४८ युतं ७६।१४। ५७।४८ ऊर्ध्वांकः षष्ट्याताष्टः शेषांकः १६ गतवत्सरोज्ञेयः वर्त्तमानः सुभानुसंवत्सराशेषं १४।५७।४८ द्वादशभिर्गुणितञ्ज्ञातंदिनादिकं १७९।३३।३६ दिनस्थानेत्रिंशद्भक्तं ज्ञातंमासादिकं ५।२९।३३।३६ एभिर्मासादिकैर्वर्तमानवर्षस्यमेषसंक्रांतिसकाशात्पूर्वप्रवृत्तः सुभानुवत्सरः इदंद्वादशमध्येशोधितेशेषं ६।०।२६।२४ एवंवर्तमानतुलांशकः ०।२६।२४ चावत्सुभानुवत्सरः ॥ तदनन्तरंतारणाख्यः ॥ एवंवर्षगणेद्वयोः फलंलेख्यं ॥ दक्षिणात्याः नर्मदायाः दक्षिणेभागे मनुजमानेन संवत्सरप्रवृत्तिमाहुः ॥ उक्तंच ॥ नर्मदोत्तरभागेस्याद्गुरुमानेनवत्सरः ॥ नर्मदायाम्यभागेतु मनुमानाद्बुधैःस्मृतः ॥ तदानयनं ॥ शालिवाहनशाकोर्कसंयुतः षष्टिहृत् प्रभवपूर्ववत्सगतुमानेन ॥ अथगुरूदयानयनमाह स्याद्दूर्जादिपुमासेषुवन्हिभादिद्वयंद्वयं ॥ उपांत्यपंचमांतेषुनक्षत्राणांत्रयंत्रयं ॥ अस्मिन्नाद्युदिनोजीवस्तन्नक्षत्राख्यवत्सरः ॥ तद्यथा ॥ यस्मिन्समयेगुरोरुदयः तस्मिन् समयेयस्मिन् नक्षत्रेगुरुर्निष्ठति तन्नक्षत्रस्थयोमासः सगुरुवर्षसंज्ञकोज्ञेयः ॥ कृत्तिकारोहिणीस्थितोगुरुः सूर्यसान्निध्यादुदयंप्राप्तस्तदा कार्तिकसंज्ञकंगुरुवर्षंज्ञेयं ॥ मृगार्द्रयोर्मार्गशीर्षं० ॥ पुनर्वसुपुष्ययोः पौषं ॥ श्लेषामघयोर्माघं ॥ पूर्वोत्तराभाद्रस्तेषुफाल्गुनः ॥ चित्रास्वात्योश्चैत्रं ॥ विशाखानुराधयोर्वैशाखं० ॥ ज्येष्ठामूलयोर्ज्येष्ठसंज्ञं० ॥ पूर्वोत्तराषाढयोराषाढं० ॥ हरिवासवयोः श्रावणं० ॥ शततारकापूर्वाभाद्रपदोत्तराभाद्रपदस्वभाद्रं ॥ अंत्यदास्त्रयभानामाश्विनसं० ॥ तत्रपंचमः फाल्गुनः अंत्य आश्विनः उपांत्योभाद्रपदस्तेषुप्रत्येकंनक्षत्रत्रययोगोज्ञातव्यः ॥ सूर्यसिद्धांतवचनादस्तमयनक्षत्रादपि गुरुवर्षंज्ञेयमिति ॥ अत्रास्तमयोदयन-

क्षत्रमेकमेववाहुल्योनभवति। तथापिकदाचिद्विसंवादेउदयास्तभादिति उभयनक्षत्रोपादानादुभययुतानिमिश्रीभावेनवक्तव्यानि॥
गुरूदयदिनमारभ्योपक्रमइत्यर्हगणः॥ प्रशंसतिसहर्क्षेणसहितोयुगपद्गुरुः॥ तस्मात्कालाददृश्यःस्यात्पूर्वश्चाब्दःप्रवर्तते॥ ऋक्षपू
र्वइतिवचनात्॥ कार्तिकादयोगुरूदयादब्दाउदितदिवसात्॥ प्रभवोदयस्तुमध्यमगुरुराशिभोगादितिविवेकः॥ बहुसंमतत्वात्॥ गुरूदया
द्गुरोरब्दविचारणात्कर्तव्येत्यर्थः॥ गुर्वब्दफलंगुरूदयादग्रिमगुरूदयपर्यंतंज्ञेयं॥ यस्मिन्वर्षेगुरूदयेपुनर्वसुनक्षत्रेगुरुस्तिष्ठतिइतिकारणात्इ-
त्यौपसंज्ञकंगुरुवर्षंतस्यफलंलेख्यं॥ अथराजादिनिर्णयः॥ चैत्रादिमेषादिकुलीरतौलिमृगाख्यमार्द्राधनुरादिवाराः॥ राजाचमूसस्यरसा-
धिपाश्चस्युर्नीरसेशांबुधिधान्यनायाः॥१॥ प्रतिपदियदिचैत्रेशुक्लपक्षेभवेतांकयमपियदिवारौद्वौतदाभूपतिःकः॥ प्रथमदिवसवारःकीर्ति-
तोगणमुख्यैर्गणवतिसतिडिंभेराज्यभागज्येष्ठएव॥२॥ डिंभोबालः॥ पोतःपाकोर्भकोडिंभइत्यभिधानात्॥ कांबोजादिदेशेषुविशेषउक्तः॥
कांबोजखार्जूरकिरातसिंधुदेशेषुविल्वेष्वपिदर्दुरेषु॥ किंत्वुन्नमध्यान्हगतोब्दपःस्यादन्येषुसूर्योदयगोदिनेशः॥ अन्यच्च॥ प्रतिपद्दर्शसंधिश्चम-
ध्यान्हात्पूर्वतोयदि॥ तदातद्दिनपोराजापरतश्चेत्परोभवेत्॥ अत्रकेचिच्चांद्रवर्षस्यप्रतिपदादिदक्षिणेवर्षेप्रवेशात्तत्रत्यएववारोवर्षेशइत्याहुः
पदंतिच॥फाल्गुनांतेकुन्हराजेति॥ तदेतद्गुर्जरदेशेप्राचुर्येणवर्तते॥ दक्षिणात्यौदयिकप्रतिपदवारमेवराजानमाहुः॥ कश्यपः॥ चैत्रशु-
क्लाद्यदिवसेकिंस्तुघ्नेववकेथवा॥ अर्कोदयोतुयोवारःसोब्दपःपरिकीर्तितः॥ चैत्रशुक्लप्रतिपद्दिवसेयोवारःसराजा॥ मेषसंक्रांतिदिव-
सेयोवारःसमंत्री॥ कर्कसंक्रांतिदिवसेयोवारःससस्याधिपः॥ तुलासंक्रांतिदिवसेवारःसरसाधिपः॥ मृगसंक्रांतिदिवसेयोवारोनीरसाधिप
॥आर्द्राप्रवेशदिवसेयोवारःसमेघाधिपः॥ धनुःसंक्रांतिदिवसेयोवारःसपश्चिमघान्याधिपः॥ एतेषांफलानिक्रमतोलेख्यानि॥ तदनंतरंगाय
त्स्यांतियोयस्मिन्वारेयस्मिन्नक्षत्रेयस्मिन्योगेआर्द्राप्रवेशस्तत्फलानिलेख्यानि॥ दिवारात्रौवाप्रवेशस्तत्फलंलेख्यं॥ अथनवमेघानयनं॥ गताब्दान

वाभिस्तष्टशेषंहारगद्विशोधयेत् ॥ ततश्चावर्तसंवर्तद्रोणपुष्करकीलकः, नीलश्चवरुणोवायुतमोमेघाः स्मृतानच ॥ अत्रगताब्दानयनं ॥ युग्मचंद्रशर
मंदपिहीनाशालिवाहनशकानूनताः समाः ॥ उदाहरणं ॥ शकः १५५६ अनेन १५५२ रहिताजातागताब्दाः ४४ नवाभिस्तष्टशेषं ८ हारात्शोधितं १
आवर्तसंज्ञकोमेघस्तत्फलं लेख्यंकेचित्तुमेघचतुष्टयमाहुस्तदानयनचत्रिभिर्गताब्दाः सहिताश्चतुर्भिः शेषंभवेदंबुपतिः क्रमेणआवर्तसंवर्तक
पुष्करश्चद्रोणश्चतुर्थोमुनिभिः प्रदिष्टः । अत्रापिपूर्ववद्गताब्दानयनं ॥ आवर्ते छिन्नवृष्टिः स्यात्संवर्ते जलपूरिता ॥ पुष्करे मंदवृष्टिः स्यात्
द्रोणोवर्षनिसर्नदा ॥ अथद्वादशनागानयनं ॥ गताब्दाद्विद्युताः सूर्यभक्तास्तत्रावशेषिताः ॥ सवुद्धोनंदसारीचकर्कोटकपृथुश्रवाः ॥ वा
सुकिस्तक्षकश्चैवकंबलाश्वतरावुभौ ॥ हेममालीनरेंद्रश्चवज्रदंष्ट्रोरथस्तथा ॥ अत्रापिपूर्ववद्गताब्दाज्ञेयाः ॥ उदाहरणं ॥ गताब्दाः ४४
द्विद्युताः ४६ द्वादशभिस्तष्टाः शेषं १० नरेंद्रसंज्ञकोनागस्तत्फलं ॥ केचित्तुनागाष्टकमाहुस्तदानयनं ॥ शाकोरसाद्रिसंयुक्तो वसुभिः
भागशेषकः ॥ अनन्तादिक्रमेणैवअष्टौनागाः प्रकीर्तिताः ॥ अनन्तोवासुकिः पद्मोमहापद्मः सुतक्षकः ॥ कुलीरः कर्कटः शङ्ख
श्चाष्टौनागाः प्रकीर्तिताः ॥ अथसप्तवातानयनं ॥ शाकः शशांकसंयुक्तोमुनिभिर्भागहारितः ॥ आवहादिक्रमेणैवसप्तवाताः प्रकी
र्तिताः ॥ आवहः प्रवहश्चैवसंवहोविवहस्तथा ॥ उद्वहोतिवहश्चैवसप्तवाताः प्रकीर्तिताः ॥ अथवर्षादिनामानयनं ॥ महादेवः
॥ शाकः त्रिगुण्यो नगभाजिनश्चशेषंद्विनिघ्नंशरसंयुतंच ॥ लब्धंचशाकञ्चपुनः प्रकल्प्य पूर्वोक्तवत्स्युः खलु विश्वकाख्याः ॥
वर्षाचधान्यंतृणशीततेजोवायुश्चवृद्धिक्षयविग्रहौच ॥ एवंनवाभिहितानि ॥ उदाहरणं ॥ शाकः १५५६ त्रिगुणः ४६६८ सप्त
भक्तः लब्धं ६६६ शेषं ६ द्विगुणं १२ शर ५ संयुतः १७ एतेजाताविश्वकाख्यावर्षा १७ लब्धं ६६६ त्रिभिर्गुणितं ॥ १९९८ सप्त
भक्तं २८५ शेषं ३ द्विनिघ्नं ६ शर ५ युतंजातंधान्यंएवंलब्धोपरिसर्वत्रज्ञेयं ॥ तृणं ७ शीतं ९ तेजः ९ वायुः ११ वृद्धि १७ क्षयः

९ विग्रहः ११ ॥ शाकश्चवेदगुणितंसप्तभिर्भागमाहरेत् ॥ शेषंद्विघ्नंत्रिभिर्युक्तं प्रोक्तंविश्वाख्यसंज्ञकं ॥ क्षुधातृषातथानिद्रा
चालस्यंचोद्यमस्तथा ॥ शांतिःक्रोधस्तथा दंभोलोभो मैथुनमेवच ॥ ततस्तुरसनिष्पत्तिःफलनिष्पत्तिरेवच ॥ उत्साहः सर्वलोकानां
ज्ञातव्यंनिश्चितंबुधैः ॥ त्रयोदशोदाहरण ॥ शकः १५५६ चतुर्गुणिताः ॥ ६२२४ सप्तभक्तः लब्धं ८८९ शेषं १ द्विघ्न २ त्रियुतं ५
जाताक्षुधा ॥ पुनर्लब्धं ८८९ चतुर्गुणं ३५५६ सप्त ७ भक्तं लब्धं ५०८ शेषं ० त्रियुतं तृषा ३ एवंलब्धोपरिसर्वत्रज्ञेयं निद्रा ७ आ-
लस्य १३ उद्यमः ७ शांतिः १३ क्रोधः ७ दम्भः ५ लोभः १३ मैथुनं १५ रसोत्पत्तिः १५ फलानि ५ उत्साहः ११ शकाब्दंवसुभिर्निघ्नं
नवभिर्भागमाहरेत् ॥ शेषंतुद्विगुणीकृत्यरूपमत्रापियोजयेत् ॥ उग्रंपापंचपुण्यंच व्याधिव्याधिविनाशनं ॥ आचारश्चाप्यनाचा-
रोमरणंजनिरेवच ॥ देशस्योपद्रवस्वास्थ्यंचौराकुलभयंतथा ॥ अथैषांपञ्चदशानामुदाहरणं ॥ शकः १५५६ अष्टगुणः १२४४८
नवभिर्भक्तः लब्ध १३८३ शेषं २ द्विनिघ्नं २ रूपं १ योज्यं १ जातंउग्रं ३ एवंलब्धोपरिसर्वत्रज्ञेयम् ॥ उग्रपापइत्यादिनाअग्निनाशप-
र्यंतंपंचदशज्ञेयाः ॥ शकः पञ्चभिःसप्तभिर्गोभिरीशैश्चतुर्धाहतः सप्तभक्तावशिष्टः ॥ द्विनिघ्नंत्रिभिर्युक्तमुद्भिज्जराण्डजस्वेदजानां
द्विविंशोपकाःस्युः ॥ उदाहरणं ॥ शकः १५५६ चतुर्धास्थाप्यः १५५६ क्रमेणगुणकैर्गुणितः ७७८० । १०८९२ ॥ १४००४ ॥ १७११६ सर्वत्र
सप्तभक्तेशेषाणि ३ । ० । ४ । १ द्विगुणितानि ६ । ० । ८ । २ त्रिभिर्युक्तानिजातानिविंशोपकाः ॥ ९ । ३ । ११ । ५ उद्भिज्जाः ९ जरायुजाः ३ अंडजा ११
स्वेदजाः ५ एतत्स्वरूपंअमरसिंहेनोक्तं ॥ उद्भिज्जाः स्तरुगुल्माद्या पक्षिसर्पादयोंडजाः ॥ स्वेदजाः कृमिदंशाद्या मृगाद्याजरायु-
जाः ॥ अथरोहिणीचक्रं ॥ मेषार्कदिनमारभ्यऋक्षद्वयमब्धौद्वयंतटे ॥ एकंगिरौद्वयंसंधौचतुर्द्विक्षुतथान्यसेत् ॥ साभिजिच्चक्रमेणैवफलं
यत्रतुरोहिणी ॥ अतिवृष्टिः समुद्रेस्यात्तटेवृष्टेरवर्षणं ॥ गिरौसंधौखंडवृष्टिरित्याहुः पूर्वसूरयः ॥ अथाब्दपानयनं ॥ भूनंदति

इतिमकरन्दसारिणीउदाहरणसहसमाप्ता.